# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| कक्षा - शास्त्री-३, सेमेस्टर-५ | प्रश्नपत्रम् - ७ | गुणाः - ७० |
| विषयः - पुराणेतिहासः | कोड - CE-3.5.9 | समयः - ११-०२ |
| दिनाङ्कः - १.१२.२०१६ | ग्रन्थः - श्रीमद्भागवते २-८ स्कन्धौ | |

---

**प्रथमान्वितिः ( युनिट - १ )**

**प्रश्नः १ कयोश्चिद् द्वयोः ससन्दर्भं व्याख्यां कुरुत ।** ०८

(१) *तस्माद्भारत सर्वात्मा भगवानीश्वरो हरिः ।*
*श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयम् ॥*

(२) *किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह ।*
*वरं मुहूर्तं विदितं घटेत श्रेयसे यतः ॥*

(३) *चीराणि किं पथि न सन्ति दिशन्ति भिक्षां*
*नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन् ।*
*रुद्धा गुहाः किमजितोऽवति नोपसन्नान्*
*कस्माद् भजन्ति कवयो धनदुर्मदान्धान् ॥*

**प्रश्नः २ कस्यचिदेकस्य वर्णनं कुरुत ।** ०८

*(१) भगवतो विराटस्वरूपम् ।* *(२) सृष्टिवर्णनम् ।*

**प्रश्नः ३ कयोश्चित् द्वयोः टिप्पणी लेख्या ।** ०४

*(१) भगवल्लीलावतारकथाः ।*
*(२) भागवतस्य दशलक्षणानि ।*
*(३) ब्रह्मणा कृतं भगवद्धामदर्शनम् ।*
*(४) क्रममुक्तिः सद्यः मुक्तिश्च ।*

**प्रश्नः ४ अधो दत्तेभ्यः पञ्चानाम् एकैकवाक्येन उत्तरं यच्छत ।** ०५

(१) *गृहमेधिनां नक्तं कथं ह्रियते ?*
(२) *ब्रह्मसम्मितं पुराणं नाम किम् ?*
(३) *शुकदेवः भागवतं कस्य सकाशादधीतवान् ?*
(४) *द्वितीयस्कन्धे कति अध्यायाः सन्ति ?*
(५) *अज्ञानमूलकवासनायाः विनाशः केन भवति ?*
(६) *विद्याकामः पुमान् कं यजेत् ?*
(७) *मोक्षकामः पुमान् प्रभुं कथं यजेत् ?*

**द्वितीयान्वितिः ( युनिट - २ )**

**प्रश्नः ५ कयोश्चित् द्वयोः ससन्दर्भं व्याख्या विधेया ।** ०८

(१) *तप्यन्ते लोकतापेन साधवः प्रायशो जनाः ।*
*परमाराधनं तद्धि पुरुषस्याखिलात्मनः ॥*

(२) *एवं व्यवसितो बुद्ध्या समाधाय मनो हृदि ।*
*जजाप परमं जाप्यं प्राग्जन्मन्यनुशिक्षितम् ॥*

(३) *सोऽन्तः सरस्युरुबलेन गृहीत आर्तो-*
*दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रम् ।*
*उत्क्षिप्य साम्बुजकरं गिरमाहकृच्छ्रा-*
*न्नारायणाखिलगुरो भगवन् नमस्ते ॥*

**प्रश्नः ६ कस्याप्येकस्य वर्णनं कुरुत ।** ०८
*(१) मन्वन्तराणां वर्णनम् ।* *(२) गजेन्द्रमोक्षः ।*

**प्रश्नः ७ कस्यचिदेकस्य टिप्पणी लेख्या ।** ०२
*(१) भगवतः शङ्करस्य विषपनम् ।* *(२) देवासुरयोर्युद्धम् ।*

**प्रश्नः ८ प्रदत्तेभ्यः द्वयोः संक्षेपेण उत्तरं दत्त ।** ०२
*(१) कथं भगवान् पुत्रतां गतः ?*
*(२) आकूत्यादयः कस्य पुत्र्यः ?*
*(३) केनरूपेण भगवान् ज्ञानोपदेशं ददौ ?*
*(४) गिरिवरः स्त्रिकूटः कुत्रासीत् ?*

## तृतीयान्वितिः ( युनिट - ३ )

**प्रश्नः ९ ससन्दर्भं कयोश्चित् द्वयोः व्याख्यां कुरुत ।** ०८

(१) *एष विप्रबलोदर्कः सम्प्रत्यूर्जितविक्रमः ।*
*तेषामेवापमानेन सानुबन्धो विनङ्क्ष्यति ॥*

(२) *गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि ।*
*यदि निर्यान्ति ते नूनं फेरुराजगृहोपमाः ।*

(३) *यत्पूजया कामदुघान् याति लोकान् गृहान्वितः ।*
*ब्राह्मणोऽग्निश्च वै विष्णोः सर्वदेवात्मनो मुखम् ॥*

**प्रश्नः १० कस्याप्येकस्य सारः देयः ।** ०८
*(१) कश्यपेन प्रदत्तः पयोव्रतोपदेशः ।*
*(२) भगवतः वामनस्य प्राकट्यम् ।*

**प्रश्नः ११ टिप्पणी लेख्या ।( द्वयोः )** ०४
*(१) बलिना कृता भगवत्स्तुतिः ।*
*(२) भगवतः मत्स्यावतारः ।*
*(३) मन्वादीनां कर्मणां निरूपणम् ।*
*(४) भगवान वामनः ।*

**प्रश्नः १२ प्रदत्तेभ्यः पञ्चानाम् एक-एक वाक्येन उत्तरं दत्त ।** ०५
*(१) विवस्वतः पुत्रः कः ?*
*(२) भगवतः वामनस्य मातापित्रोः नाम किम् ?*
*(३) छाया कस्य पत्न्यासीत् ?*
*(४) विरोचनपुत्रः अर्थात् कः ?*
*(५) शुक्राचार्यः कस्य पुत्रासीत् ?*
*(६) पयोव्रतं कदा कार्यम् ?*
*(७) वामनस्य प्रादुर्भावः कदा अभवत् ?*

=०=